# NoTTu Svara SAhityam-s (Western Melody)

# नोट्टुस्वरसाहित्यम्

## Document Information

Text title : nOTTUsvarasAhityam (Western Melody) by Muttuswami dikShita

File name : nOTTUsvarasAhityam.itx

Category : kRitI, major_works, muttusvAmI-dIkShitAra

Location : doc_z_misc_major_works

Author : Muttusvami Dikshitar

Transliterated by : Pallasena Narayanaswami ppnswami at gmail.com

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Collection

Latest update : March 15, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# NoTTu Svara SAhityam-s (Western Melody)

# नोट्टुस्वरसाहित्यम्

MuttusvAmi DIkShitar had occasion to listen to Western Music when he came in contact with East India Company officials and their English Musical band. The stringed instrument, violin, was introduced in KarNATik music by his younger brother BAlusvAmi DIkShitar, who was initiated to learn European violin by the patron MaNali ChinnasvAmi MudaliAr. With this influence, DIkShitar composed many kRRitis under the classification of "NoTTu Svara SAhityam-s", all in the rAga sh NkarAbharaNaM in different tALa structures. All these are melodious, and some of them "SantataM PAhi MAM Sa NgIta shyAmaLe" is a Marching Song, which can be sung in a chorus, to the tune of "God save the King"!. These are simple songs that can easily be learnt bu children and sung in a chorus.

In his book, "prathamABhyAsa pustakamu" (in Telugu), the author, SubbarAma dIkShitar (grandson of BAlusvAmi dIkShitar, the brother of muttusvAMi dIkShitar) has given 33 of these NoTTu Svara SAhitam-s (Western melodies) with musical notations.

In his book, SubbarAma DIkShitar gives the following introduction to these melodies

" These are called jAti svaram-s. Gamakam-s do not occur specifically in these NoTTu svaram-s. All these svara=-s are (in) those of sha NkarABharaNA rAgam. They will be in tishra gati, or caturashra gati. In the sAhityam-s of NoTTu svaram-s, although in some places, long text syllables have been provided

for short svara syllables, these long text syllables should be contracted/abbreviated so as to fit the short svara syllables and the sounds of the sAhityam-s should be sung as appropriate. These svara sAhitya=-s are not only easy to sing and play on the vINA, but are also charming and very useful to beginners practising the first exercises.

One KRRiti, "gurumUrtE", is sometimes considered as a Nottu Svara song, even though it is in the usual KRRiti format with Pallavi, Anupallavi, CharaNam. In addition, there are five additional Nottusvara Sahityam-s that are found in a small book of Dr V. Raghavan, published by the Music Academy, Madras. So, here we are giving the text of 39 Nottu Svara songs of MuttusvAmi DIkShitar.

॥ नोट्टुस्वर साहित्यम् ॥

(नादज्योति मुत्तुस्वामि दीक्षितर् विरचितम्)

## ॥ १. सन्ततं पाहि माम् ॥

रागं शङ्कराभरणं - ताळं तिश्र एकं

सन्ततं पाहि मां संगीतश्यामळे
सर्वाधारे जननि रे जननि
चिन्तितार्थप्रदे चिद्रूपिणि शिवे
श्री गुरुगुहसेविते शिवमोहाकारे

## ॥ २. शक्तिसहितगणपतिम् ॥

रागं शङ्कराभरणं - ताळं तिश्र एकं

शक्तिसहितगणपतिं शङ्करादिसेवितं
विरक्तसकलमुनिवरसुरराजविनुतगुरुगुहम्
भक्ताळिपोषकं भवसुतं विनायकं

भुक्तिमुक्तिप्रदं भूषितांगम्
रक्तपादांबुजं भावयामि

## ॥ ३. गुरुगुहपदपङ्कज ॥

रागं शङ्कराभरणं - ताळं तिश्र एकं

गुरुगुहपदपङ्कजमतिगुप्तमनिशमाश्रये
निरतिशयनिजप्रकाशकनित्यसुखफलप्रदम्
नीरजनाभपुरन्दरमारारिवारिजसंभववेदितव्यं
अत्रिशुकवसिष्ठवामदेवादितपोधनवन्दितम्

## ॥ ४. गुरुगुहसरसिज ॥

रागं शङ्कराभरणं - ताळं चतुरश्र एकं

गुरुगुहसरसिजकरपदशुभकरमूर्ते
सुरवरशिवसुतभुवनपते
मुरहरहरिहयविधिनुतबहुविधकीर्ते
नरपतिनतमुनियुतसुमते
निरुपमजयकर निरतिशयसुखद
सरस सततमव स्थिरतरशक्ते

## ॥ ५. वरशिवबालं वल्लीलोलम् ॥

रागं शङ्कराभरणं - ताळं चतुरश्र एकं

वरशिवबालं वल्लीलोलं वन्देऽनन्तं
हरिहरमोदं हंसानन्दं हसितमुखम्
गुरुगुहरूपं गुप्ताकारं गोरक्षं तं
सुरपतिसेनं सुब्रह्मण्यं सुरविनुतम्

## ॥ ५. मुचुकुन्दवरद ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

मुचुकुन्दवरद त्यागराज
सुन्दरकर पादारविन्द
सरसमन्दहासवदन जय विभो
मुकुन्दपूजितांगधवळसुन्दरतर
नन्दीशनन्दित सुरबृन्दवन्दित गुरुगुहगुरो

## ॥ ७. सोमास्कन्दम्  ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

सोमास्कन्दं स्वानन्दकन्दं
कामाक्षीशं कल्याणवेषम्
सोमास्कन्दं स्वानन्दकन्दं
सुन्दरांगमाश्रयामि
गंगाधरं तं गौरीसमेतं
शृंगाररूपं श्रीसोमसूत्रम्
गंगाधरं तं गौरी समेतं
गुरुगुहरूपमाश्रयामि

## ॥ ८. पार्वतीपते ॥

रागं  शङ्कराभरणं - ताळं चतुरश्र एकं

पार्वतीपते सदा पालयाशु शंभो
पादसरोजानन्दनटनधीर विभो हे प्रभो
गर्वितदानवभीकर शङ्कर
देवदेव गोक्षीरभंगीतर
वर्णरूपाकार कामाक्षीश
एकाम्रपते गुरुगुह

## ॥ ९. चिन्तयेऽहं सदा ॥

रागं  शङ्कराभरणं - ताळं चतुरश्र एकं

चिन्तयेऽहं सदा चित्सभानायकं
चिन्तितार्थदायकं जीवेश्वरभेदापहम्
चिन्तामणिस्वरूपं ताण्डवेश्वरं
शान्तं मुनिमहितं सगुरुगुहं शङ्करम्
सन्ततं सांबमीशं मुदा भावयेऽ-
नन्तकोटिब्रह्माण्डनाथं विमलम्
आदिमध्यान्तवर्जं निराधारमाकाश-
नादान्तस्थं सुन्दरं सुधांशुमौलिं शिवं
भ्रान्तिवारणनिपुणं भानुकोटिभास्वरम्
दन्तिचर्मांबरं धनदहितं
भारतीकान्तहरिनुतं करधृतमृगमे -
कान्तहृदये शिवकामसुन्दरीपतिं

## ॥ १०. पीतवर्णं भजे ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

पीतवर्णं भजे भैरवं
भूतवेताळसंसेव्यमानम्
पीतवस्त्रं सुवर्णप्रदं
वीतरागं  गुरुगुहात्मकम्

## ॥ ११. सकल सुरविनुत ॥

रागं शङ्कराभरणं -  ताळं चतुरश्र एकं

सकलसुरविनुत शंभो स्वामिन्
विकटगुरुगुहविजय त्रिपुरहर
एकाम्रपते करुणामूर्ते   एकानेकविभूते
एकान्तहृदय एकभोगदायकानन्दकर विभो

## ॥ १२. काञ्चीशमेकाम्रनायकम् ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

काञ्चीशमेकाम्रनायकं नित्यमहं भजे
कामादिषड्वोरवृत्तिमहं त्यजे
पञ्चाक्षरस्वरूपमागमान्तसारं
पञ्चास्यमादिकारणं विश्वेश्वरं गुरुगुहम्

## ॥ १३. श्री शङ्करवर ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

श्री शङ्करवर पङ्कजकर
शंभो देव पशुपते
ओङ्काराकारसुतनो श्रीकाञ्चीनगरपते
एकाम्रेश गुरुगुहादिजनक मां पाहि (श्री)

## ॥ १४. श्यामळे मीनाक्षि ॥

रागं  शङ्कराभरणं - ताळं चतुरश्र  एकं

श्यामळे मीनाक्षि सुन्दरेश्वरसाक्षि
शङ्करि गुरुगुहसमुद्भवे शिवेऽव
पामरमोचनि पङ्कजलोचनि
पद्मासनवाणीहरिलक्ष्मीविनुते शांभवि

## ॥ १५. कमलासनवन्दित ॥

रागं  शङ्कराभरणं - ताळं चतुरश्र एकं

कमलासनवन्दितपादाब्जे
कमनीयकरोदयसाम्राज्ये
कमलानगरे सकलाकारे

कमलनयनधृतजगदाधारे
कमले विमले गुरुगुहजननी
कमलापतिनुतहृदये माये
कमलशशिविजयवदनेऽमेये
कमलेन्द्राणीवाग्देवीश्री -
गौरीपूजितहृदयानन्दे
कमलाक्षि पाहि कामाक्षि
कामेश्वरवरसति कल्याणि

## ॥ १६. सामगानप्रिये ॥

रागं शङ्कराभरणं - ताळं तिश्र एकं

सामगानप्रिये कामकोटिनिलये
शङ्करि सुन्दरि सारतरलहरि
चण्डिके निर्मले कामिनि मोदिनि
पाहि गुरुगुहजननि

## ॥ १७. हे माये ॥

रागं शङ्कराभरणं - ताळं तिश्र एकं

हे माये मां बाधितुं का हि त्वं
का हि त्वं याहि याहि
कामाक्षि काञ्चीपुरनायिके
रक्षितुं एहि एहि
कामकोटीश्वरी कामितार्थप्रदे-
काम्रनाथेश्वरि पाहि पाहि
कामसञ्जीविनि सेवितश्रीगुरो
कौळिनि मे मुदं देहि देहि

## ॥ १८. वन्दे मीनाक्षि ॥

रागं  शङ्कराभरणं - ताळं चतुरश्र एकं

वन्दे मीनाक्षि त्वां
सरसिज वक्त्रेऽपर्णे  दुर्गे
नतसुरबृन्देऽसक्ते
गुरुगुहपालिनि जलरुहचरणे
सुन्दरपाण्ड्यानन्दे माये
सूरिजनाधारे
सुन्दरराजसहोदरि गौरि
शुभकरि सततमहं

## ॥ १९. परदेवते भवभक्तमोदिनि  ॥

रागं  शङ्कराभरणं - ताळं रूपकं

परदेवते भवभक्तमोदिनि पाहि मां पालिनि
हंसिनि करुणाकरि कमलाक्षि सुन्दरि कामिनि
कौळिनि शङ्करि परिशुद्धचित्तरञ्जनि मालिनि
पादपङ्केरुहपद्मिनि  गुरुशिश्यरूपधारिणि
कोमळाकारिणि मन्त्रिणि योगिनि श्री

## ॥ २०. सदाशिवज्याये ॥

रागं  शङ्कराभरणं - ताळं चतुरश्र एकं

सदाशिवजाये विजये
सरसिजपदयुगळे सकळे
वदनकरांभोजे तारय शिववामाङ्के
वरकरविधृतशुके
सदये  गुरुगुहसेविते
शशिशेखरसंभाविते
सुधार्णवमध्यगतेऽतिललिते

शुभकरसुरनुतमुरहरमुदिते

## ॥ २१. पाहि दुर्गे ॥

रागं  शङ्कराभरणं - ताळं चतुरश्र एकं

पाहि दुर्गे  भक्तं ते
पद्मकरे विजयचिच्छक्ते
एहि देहि सर्वज्ञे यतिनुत
गणपति गुरुगुहजननि मां

## ॥ २२. माये चित्कले ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

माये चित्कले जय रमे मंगळकर -
रंगरमणि मारजननि विष्णुजाये
देहि श्रियं अब्जमालिनि दृश्यविश्वविलासे
एहि वरलक्ष्मि सुन्दरि दीप्यमान -
पादतले पद्मे दिव्यतेजोमयि रक्ष मां
रञ्जनि देवतापूजित श्री गुरुगुहे

## ॥ २३. वाग्देवि मामव ॥

रागं  शङ्कराभरणं - ताळं चतुरश्र एकं

वाग्देवि मामव कल्याणी
वाणि ब्रह्माणि सुताम्रोष्ठि
वनजवदन गुरुगुहमहिते
देवसुरपति विनुत विधिविहिते
वर्णमयि विलसित पदकमले
वरमधुरकविजनमुदितहृदये
वक्राब्जे नित्यं मे वरदे
व्यासनकशुकमुनिगणमुदिते

## ॥ २४. रामचन्द्रम् ॥

रागं  शङ्कराभरणं - ताळं चतुरश्र एकं

रामचन्द्रं राजीवाक्षं
श्यामळांगं शाश्वतकीर्तिं
कोमळहस्तं कोसलराजं
मामकहृत्कमलागारम्
मारुतियुक्तं धीमन्तं
मानितभक्तं श्रीमन्तम्
कौमारवरं गुरुगुहमित्रं
कारुण्यनिधिं दशरथपुत्रम्
भूमिसुतापं भूपतिरूपं
कोमळपल्लवपादं मोदम्
कामगुरुं सीतारामं
कौत्सुभभूषं वन्देहम्

## ॥ २५. राम जनार्दन ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

राम जनार्दन रावणमर्दन
रामानुजाग्रज राजविभो
पामरमोचन पङ्कजलोचन
भक्तजनप्रिय पालय मां
भूमिजानायक भुक्तिप्रदायक

## ॥ २६. दाशरथे ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

दाशरथे दीनबन्धो

दानवभीकर दामोदर
केशव मामव सीताधव
केयूरहार रघुवीर
कोमळपादाब्ज कोदण्डराम
श्यामळविग्रह संपूर्णकाम
नामकीर्तने सदा मोद
नारदवीणाह्लादाह्लाद

## ॥ २७. पाहि मां जानकीवल्लभ ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

पाहि मां जानकीवल्लभ श्रीहरे
भारतीशप्रियानन्द मूर्ते
देही मे संपदं दीनचिन्तामणे
देवदेवोत्तमानन्तकीर्ते
एहि काकुत्स्थ कोदण्डहस्त
ईप्सितार्त्थप्रदाह्लादचित्त

## ॥ २८. दीनबन्धो ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

दीनबन्धो दयासिन्धो सुधीमणे
मे मुदं देहि सदा देहि
जानकीनायकांभोजानन
साधुसंरक्षणापांगाखिल -
देवतासार्वभौमादिवन्द्य

## ॥ २९. पङ्कजमुख ॥

रागं  शङ्कराभरणं - ताळं तिश्र एकं

पङ्कजमुख शङ्करहित सङ्कटहर

वेङ्कटगिरिवास नारायणानन्त गोविन्द
दामोदरानन्द संरक्षकाश्रित वात्सल्य
पादांभोरुह पाहि मां दीन बन्धो

## ॥ ३०. वरदराज ॥

रागं शङ्कराभरणं - ताळं तिश्र एकं

वरदराज पाहि विभो
करिगिरीश विश्वप्रभो
सुरपतिनुत नगधर
नवनीतचोर गुरुगुहादिविहित
मुरहर मुकुन्द श्री विहित
मुरहर मुकुन्द श्री

## ॥ ३१. सन्तान सौभाग्य ॥

रागं शङ्कराभरणं - ताळं तिश्र एकं

सन्तानसौभाग्यलक्ष्मीकळत्रं
संगीतसाहित्यमोदं पवित्रम्
कुन्तीसुताप्तं कोटीरदीप्तं
शान्तं भजेऽनन्दमानन्दकन्दम्
मुकुन्दं दयासागरं पादपद्मम्

## ॥ ३२. जगदीश ॥

रागं शङ्कराभरणं - ताळं चतुरश्र एकं

जगदीश गुरुगुह हरिविधिविनुतं
देहेन्द्रियविलक्षणमानन्दलक्षणम्
नित्यं शुद्धं बुद्धं मुक्तं सत्यं
निर्विकल्पं निष्प्रञ्चमानन्दमजम्

## ॥ ३३. आञ्जनेयम् ॥

रागं शङ्कराभरणं  - ताळं तिश्र एकं

आञ्जनेयं सदा भावयामि
अप्रमेयं मुदा चिन्तयामि
अञ्जनानन्दनं वानरेशं वरं
पञ्चवक्त्रं सुरेशादिवन्द्यम्
गुरुगुहहितं शान्तं
सदा सेवितश्रीरामपादपङ्कजम्
सञ्जीविपर्वतहरं मुखाब्जं
सदा रामचन्द्रदूतं भजे

The next kRRithi is sometimes treated as a Nottu Svara Sahitham.

## ॥ ३४. गुरुमूर्ते बहुकीर्ते ॥

रागं शङ्कराभरणं  -  ताळं रूपकं

॥ पल्लवि ॥

गुरुमूर्ते   बहुकीर्ते
सुरसेनाधिपते श्री

॥ अनुपल्लवि ॥

सुरसेवित शिवभावित
सुमतेऽनिशमव मां श्री

॥ चरणम् ॥

सरसीरुहभववन्दित
सकलागमनुतदेव

॥ मध्यमकाल साहित्यम् ॥

सुरपतितनुजाधिपते
सुरवर करुणाजलधे

गिरिजात्मज षण्मुखभव
गुरुगुहशरवणभव श्री

The next five songs are given in Dr. V. Raghavan's small book on Nottu Svara Sahityas published by Music Academy, Madras (1977).

## ॥ ३५. चिन्तय चित्त श्रीपरमशिवम् ॥

रागं शङ्कराभरणं - ताळं तिश्र एकं

चिन्तय चित्त श्रीपरमशिवं
चिन्तितभक्तिं गुरुगुह-
वन्दितमूर्तिं विश्वोत्पत्तिं
बहुतरकीर्तिं भक्तप्रीतिम्
सन्ततमच्युत पङ्कजभवनुत
शङ्करं काञ्चीशम्

## ॥ ३६. राजीवलोचनं रामचन्द्रम् ॥

रागं शङ्कराभरणं - ताळं तिश्र एकं

राजीवलोचनं रामचन्द्रं
रामानुजाग्रजं राजेन्द्रम्
सद्गुण सान्द्रं कृपापांगं
सद्गुरुगुहमुदितं शान्तम्
रावणान्तकं जनकसुतारमणं
भक्तभरणं परमघनश्यामळम्
श्रीरघुकुलतिलकाभरणं
भरतशत्रुघ्नसोदरम्
विभीषणविनुतपदं
सुग्रीवप्रमुखादिनुतपादपङ्कजम्
कौसल्यात्मजं कोदण्डकरं
अहल्यादेवीशापविमोचनसुचरित्रम्

कौत्सुभधारिणं कैवल्यप्रदं
दशरथात्मजं भजेऽहम्

## ॥ ३७. शौरिविधिनुते ॥

रागं शङ्कराभरणं - ताळं चतुरश्र एकं

शौरिविधिनुते शांभवि ललिते
शान्तेऽतीते शङ्करमुदिते
गौरि सुरहितैकाम्रपतियुते
कामाक्षि मां पाहि
वीरवरविनुतचरणांभोजे
धीरतरमलयवरहिमगिरिजे
शूरहरण गुरुगुहमातः
संसारतरचरणतरकमले

## ॥ ३८. सन्ततं गोविन्दराजम् ॥

रागं शङ्कराभरणं - ताळं तिश्र एकं

सन्ततं गोविन्दराजं सदा
वन्दितनारदमुनिबृन्दम्
सन्तानकृष्णं आनन्दकन्दं
चिन्तितं चिदानन्दकन्दम्
रुक्मिणीसत्यभामासमेतं
नीलमेघजितसुन्दरगात्रम्
शंखचक्रधरं शान्तं पङ्कजपादं
पद्मकरं परशुरामसेवितम्
गुरुगुहमुदं सार्वभौमनन्दगोपालं
गिरिधरं वेणुगानलोलं स्मराम्यहम्

# ॥ ३९. सुब्रह्मण्यन् ॥

रागं  शङ्कराभरणं -  ताळं चतुरश्र एकं

सुब्रह्मण्यं सुरसेव्याब्जपदं
सुन्दरवदनं सुकुमारविनुतलावण्यम्
शुभगात्रं शुभकरनेत्रं
सोमात्मकं आश्रितकल्पभूमिरुहम्
सूरि गुरुगुहं  सुरराजविधिनुतसर्वज्ञं
सुमते चिन्तय गुरुनाथम्
स्वाज्ञानविदारणपण्डितसाधुजनं सूनृतवचनम्

Encoded and proofread by Pallasena Narayanaswami ppnswami at gmail.com

*NoTTu Svara SAhityam-s (Western Melody)*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*